

॥ श्रीगुरुभ्यो नमः ॥

# कृष्ण यजुर्वेदीय तैत्तिरीय संहिता

## प्रथमकाण्डे अष्टमः प्रश्नः

### राजसूयः

ॐ नमः परमात्मने । श्री गुरुभ्यो नमः । हरिः ॐ

अनुमत्यै पुरोडाशमष्टाकपालन्निर्वपति धेनुर् दक्षिणा ये प्रत्यञ्चः शम्याया अवशीयन्ते तन्नैर्ऋतमेककपालङ्कृष्णँव्वासः कृष्णतूषं दक्षिणा वीहि स्वाहाऽऽहुतिञ्जुषाण एष ते निर्-ऋते भागो भूते हविष्मत्यसि मुञ्चेममꣳहसः स्वाहा नमो य इदञ्चकाराऽऽदित्यञ्चरुन्निर्वपति वरो दक्षिणाऽऽग्नावैष्णवमेकादशकपालँव्वामनो वही दक्षिणाऽग्नीषोमीय ॥ [१] ॥
मेकादशकपालꣳ हिरण्यन्दक्षिणैन्द्रमेकादशकपालमृषभो वही दक्षिणाऽऽग्नेयमष्टाकपालमैन्द्रन्दद्ध्यृषभो वही दक्षिणैन्द्राग्नन्द्वादशकपालँव्वैश्वदेवञ्चरुम्प्रथमजो वथ्सो दक्षिणा सौम्यꣳ श्यामाकञ्चरुँव्वासो दक्षिणा सरस्वत्यै चरुꣳ सरस्वते चरुम्मिथुनौ गावौ दक्षिणा ॥ [२] ॥

(अग्नीषोमीयंचतुस्त्रिꣳशच्च) ॥ १ ॥

आग्नेयमष्टाकपालन्निर्वपति सौम्यञ्चरुꣳ सावित्रंद्वादशकपालꣳ सारस्वतञ्चरुम्पौष्णञ्चरुम्मारुतꣳ सप्तकपालँव्वैश्वदेवीमामिक्षान्द्यावापृथिव्यमेककपालम् ॥ [३] ॥

(आग्नेयꣳ सौम्यम्मारुतमष्टादश) ॥ २ ॥

ऐन्द्राग्नमेकादशकपालम्मारुतीमामिक्षाँव्वारुणीमामिक्षाङ्कायमेककपालम्प्रघास्यान्हवामहे मरुतो यज्ञवाहसः करम्भेण सजोषसः॥ मो षू ण इन्द्र पृत्सु देवास्तु स्म ते शुष्मिन्नवया। मही ह्यस्य मीढुषो यव्या। हविष्मतो मरुतो वन्दते गीः॥ यद् ग्रामे यदरण्ये यथ् सभायाय्यँ-दिन्द्रिये। यच्छूद्रे यदर्य एनश्चकृमा वयम्। यदे कस्याधि धर्मणि तस्यावयजनमसि स्वाहा॥ अक्रन् कर्म कर्मकृतः सह वाचा मयोभुवा। देवेभ्यः कर्म कृत्वाऽस्तम्प्रेत सुदानवः ॥ [४] ॥

(वयय्यँद्विं॑शतिश्च) ॥ ३ ॥

अग्नयेऽनीकवते पुरोडाशमष्टाकपालन्निर्वपति साकꣳ सूर्येणोद्यता मरुद्भ्यः सान्तपनेभ्यो मद्ध्यन्दिने चरुम्मरुद्भ्यो गृहमेधिभ्यः सर्वासान्दुग्धे सायञ्चरुम्पूर्णा दर्वि परापत सुपूर्णा पुनरापत। वस्नेव वि क्रीणावहा इषमूर्जꣳ शतक्रतो॥ देहि मे ददामि ते नि मे धेहि नि ते दधे। निहारमिन्नि मे हरा नि हारं ॥ [५] ॥ नि हरामि ते॥ मरुद्भ्यः क्रीडिभ्यः पुरोडाशꣳ सप्तकपालन्निर्वपति साकꣳ सूर्येणोद्यताऽऽग्नेयमष्टाकपालन्निर्वपति सौम्यञ्चरुꣳ सावित्रन्द्वादशकपालꣳ सारस्वतं चरुम्पौष्णञ्चरुमैन्द्राग्नमेकादशकपालमैन्द्रञ्चरुव्वैँश्वकर्मणमेककपालम् ॥ [६] ॥

(हरा निहारन्त्रिꣳशाच्च) ॥ ४ ॥

सोमाय पितृमते पुरोडाशꣳ षट्कपालं निर्वपति पितृभ्यो बर्हिषद्भ्यो धानाः पितृभ्योऽग्निष्वात्तेभ्योऽभिवान्यायै दुग्धे मन्थमेतत् ते तत ये च त्वामन्वेतत् ते पितामह प्रपितामह ये च त्वामन्वत्र पितरो यथाभागं मन्दद्ध्वꣳ सुसन्दृशन्त्वा वयम्मघवन् मन्दिषीमहि। प्रनूनम्पूर्णवन्धुरः स्तुतो यासि वशाꣳ अनु। योजा न्विन्द्र ते हरी ॥ [७] ॥ अक्षन्नमीमदन्त ह्यव प्रिया अधूषत। अस्तोषत स्वभानवो विप्रा नविष्ठया मती। योजा न्विन्द्र ते हरी॥ अक्षन् पितरोऽमीमदन्त पितरोऽतीतृपन्त पितरोऽमीमृजन्त पितरः॥ परेत पितरः सोम्या गंभीरैः पथिभिः पूर्व्यैः। अथा पितृन्थ् सुविदत्राꣳ अपीत यमेन ये सधमादम्मदन्ति॥ मनो न्वा हुवामहे नाराशꣳसेन स्तोमेन पितृणाञ्च मन्मभिः॥ आ ॥ [८] ॥ न एतु मनः पुनः क्रत्वे दक्षाय

जीवसे। ज्योक् च सूर्यन्दृशे॥ पुनर्नः पितरो मनो ददातु दैव्यो जनः। जीववँव्रातꣳ सचेमहि॥ यदन्तरिख्षम्पृथिवीमुत द्याँय्यन्मातरम्पितरँव्वा जिहिꣳसिम। अग्निर् मा तस्मादेनसो गार्ह-पत्यः प्र मुञ्चतु दुरिता यानि चकृम करोतु मामनेनसम् ॥ [९] ॥

(हरीमन्मभिराचतुश्चत्वारिꣳशच्च) ॥ ५ ॥

---

प्रतिपूरुषमेककपालान् निर्वपत्येकमतिरिक्तँय्यावन्तो गृह्याः स्मस्तेभ्यः कमकरम्पशूनाꣳ शर्मासि शर्म यजमानस्य शर्म मे यच्छैक एव रुद्रो न द्वितीयाय तस्थ आख्उस्ते रुद्र पशु-स्तञ्जुषस्वैष ते रुद्र भागः सह स्वस्राऽंबिकया तञ्जुषस्व भेषजङ्गवेऽश्वाय पुरुषाय भेषजमथो अस्मभ्यम्भेषजꣳ सुभेषज ॥ [१०] ॥ यँथाऽसति। सुगम्मेषाय मेष्यै अवांब रुद्रमदिम-ह्यव देवन्त्र्यंबकम्। यथा नः श्रेयसः करद् यथा नो वस्यसः करद् यथा नः पशुमतः करद् यथा नो व्यवसाययात्॥ त्र्यंबकँय्यजामहे सुगन्धिम्पुष्टिवर्द्धनम्। उर्वारुकमिव बन्धनान् मृत्योर् मुख्षीय माऽमृतात्॥ एष ते रुद्र भागस्तञ्जुषस्व तेनावसेन परो मूजवतोऽतीह्य वततधन्वा पिनाकहस्तः कृत्तिवासाः ॥ [११] ॥

(सुभेषजमिहि त्रीणि च) ॥ ६ ॥

---

ऐन्द्राग्नन्द्वादशकपालँव्वैश्वदेवञ्चरुमिन्द्राय शुनासीराय पुरोडाशन्द्वादशकपालँव्वायव्य-म्पयः सौर्यमेककपालन्द्वादशगवꣳ सीरन्दख्षिणाऽऽग्नेयमष्टाकपालन्निर्वपति रौद्रङ्गावीधुकञ्च-रुमैन्द्रन्दधि वारुणँय्यवमयञ्चरुँव्वहिनी धेनुर् दख्षिणा ये देवाः पुरस्सदोऽग्निनेत्रा दख्षिणसदो यमनेत्राः पश्चाथ्सदः सवितृनेत्रा उत्तरसदो वरुणनेत्रा उपरिषदो बृहस्पतिनेत्रा रख्षोहणस्ते नः पान्तु ते नोऽवन्तु तेभ्यो ॥ [१२] ॥ नमस्तेभ्यः स्वाहा समूढꣳ रख्षः सन्दग्धꣳ रख्ष इदमहꣳ रख्षोऽभि सन्दहाम्यग्नये रख्षोघ्ने स्वाहा यमाय सवित्रे वरुणाय बृहस्प-तये दुवस्वते रख्षोघ्ने स्वाहा प्रष्टिवाही रथो दख्षिणा देवस्य त्वा सवितुः प्रसवेऽश्विनोर्

बाहुभ्याम्पूष्णो हस्ताभ्याꣳ रक्षसो वधञ्जुहोमि हतꣳ रक्षोऽवधिष्म रक्षो यद् वस्ते तद् दक्षिणा ॥ [१३] ॥

(तेभ्यःपञ्चचत्वारिꣳशच्च) ॥ ७ ॥

धात्रे पुरोडाशन्द्वादशकपालन्निर्वपत्यनुमत्यै चरुꣳ राकायै चरुꣳ सिनीवाल्यै चरुङ्कुह्वै चरुम्मिथुनौ गावौ दक्षिणाऽऽग्नावैष्णवमेकादशकपालन्निर्वपत्यैन्द्रावैष्णव मेकादशकपालव्ँवैष्णवन्त्रिकपालव्ँवामनो वही दक्षिणाऽग्नीषोमीयमेकादशकपालं निर्वपतीन्द्रासोमीय मेकादशकपालꣳ सौम्यञ्चरुम्बभ्रुर् दक्षिणा सोमापौष्णञ्चरुन्निर्वपत्यैन्द्रा पौष्णञ्चरुम्पौष्णञ्चरुꣳ श्यामो दक्षिणा वैश्वानरन्द्वादशकपालन्निर् वपति हिरण्यन्दक्षिणा वारुणय्ँयवमयञ्चरुमश्वो दक्षिणा ॥ [१४] ॥

(वैश्वानरन्द्वादशकपालन्निरष्टौ च) ॥ ८ ॥

बार्हस्पत्यञ्चरुन्निर्वपति ब्रह्मणो गृहे शितिपृष्ठो दक्षिणैन्द्रमेकादशकपालꣳ राजन्यस्य गृह ऋषभो दक्षिणाऽऽदित्यञ्चरुम्महिष्यै गृहे धेनुर् दक्षिणा नैर्ऋतञ्चरुम्परिवृत्त्यै गृहे कृष्णानाव्ँव्रीहीणान्नखनिर्भिन्नङ्कृष्णा कूटा दक्षिणाऽऽग्नेयमष्टाकपालꣳ सेनान्यो गृहे हिरण्यन्दक्षिणा वारुणन्दशकपालꣳ सूतस्य गृहे महानिरष्टो दक्षिणा मारुतꣳ सप्तकपालङ्ग्रामण्यो गृहे पृश्निर् दक्षिणा सावित्रन्द्वादशकपालं ॥ [१५] ॥ क्षत्तुर् गृह उपद्ध्वस्तो दक्षिणाऽऽश्विनन्द्विकपालꣳ सङ्ग्रहीतुर् गृहे सवात्यौ दक्षिणा पौष्णञ्चरुम्भागदुघस्य गृहे श्यामो दक्षिणा रौद्रङ्गावीधुकञ्चरुमक्षावापस्य गृहे शबल उद्वारो दक्षिणेन्द्राय सुत्राम्णे पुरोडाशमेकादशकपालम्प्रति निर्वपतीन्द्रायाꣳहोमुचेऽयन्नो राजा वृत्रहा राजा भूत्वा वृत्रव्ँवद्ध्यान् मैत्राबार्हस्पत्यम्भवति श्वेतायै श्वेतवत्सायै दुग्धे स्वयंमूर्ते स्वयंमथित आज्य आश्वत्थे ॥ [१६] ॥ पात्रे चतुःस्रक्तौ स्वयमवपन्नायै शाखायै कर्णाꣳश्चाकर्णाꣳश्च तण्डुलान् वि चिनुयाद् ये कर्णाः स पयसि बार्हस्पत्यो येऽकर्णाः स आज्ये मैत्रः स्वयंकृता वेदिर् भवति स्वयन्दिनम्बर्हिः स्वयंकृत इद्ध्मः सैव श्वेता श्वेतवत्सा दक्षिणा ॥ [१७] ॥

(सावित्रन्द्वादशकपालमाश्वत्थे त्रयस्त्रिꣳशच्च)　॥ ९ ॥

अग्नये गृहपतये पुरोडाशमष्टाकपालन्निर्वपति कृष्णानां व्रीहीणाꣳ सोमाय वनस्पतये श्यामाकञ्चरुꣳ सवित्रे सत्यप्रसवाय पुरोडाशन्द्वादशकपालमाशूनाव्ँव्रीहीणाꣳ रुद्राय पशुपतये गावीधुकञ्चरुम्बृहस्पतये वाचस्पतये नैवारञ्चरुमिन्द्राय ज्येष्ठाय पुरोडाशमेकादशकपालम्महा-व्रीहीणाम्मित्राय सत्यायाऽऽम्बानाञ्चरुव्ँवरुणाय धर्मपतये यवमयञ्चरुꣳ सविता त्वा प्रसवानाꣳ सुवतामग्निर् गृहपतीनाꣳ सोमो वनस्पतीनाꣳ रुद्रः पशूनां　॥ [१८] ॥ बृहस्पतिर् वाचामिन्द्रो ज्येष्ठानाम्मित्रः सत्यानाव्ँवरुणो धर्मपतीनाय्ँये देवा देवसुवः स्थ त इममामुष्यायणमनमित्राय सुवद्ध्वम्महते क्षत्राय महत आधिपत्याय महते जानराज्यायैष वो भरता राजा सोमोऽस्माक-म्ब्राह्मणानाꣳ राजा प्रति त्यन्नाम राज्यमधायि स्वान्तनुव्ँवरुणो अशिश्रेच्छुचेर् मित्रस्य व्रत्या अभूमामन्महि महत ऋतस्य नाम सर्वे व्राता वरुणस्याभूवन् वि मित्र एवैररातिमतारीदसूषु-दन्त यज्ञिया ऋतेन व्यु त्रितो जरिमाणन्न आनड् विष्णोः क्रमोऽसि विष्णोः क्रान्तमसि विष्णोर् विक्रान्तमसि　॥ [१९] ॥

(पशूनांव्राताःपञ्चविꣳशतिश्च)　॥ १० ॥

अर्थेतः स्थाऽपाम्पतिरसि वृषाऽस्यूर्मिर् वृषसेनोऽसि व्रजक्षितः स्थ मरुतामोजः स्थ सूर्य-वर्चसः स्थ सूर्यत्वचसः स्थ मान्दाः स्थ वाशाः स्थ शक्करीः स्थ विश्वभृतः स्थ जनभृतः स्थाऽग्नेस्तेजस्याः स्थाऽपामोषधीनाꣳ रसः स्थाऽपो देवीर् मधुमतीरगृह्णन्नूर्जस्वती राजसूयाय चितानाः॥ याभिर् मित्रावरुणावभ्यषिञ्चन्याभिरिन्द्रमनयन्नत्य रातीः॥ राष्ट्रदाः स्थ राष्ट्रन्दत्त स्वाहा राष्ट्रदाः स्थ राष्ट्रममुष्मै दत्त　॥ [२०] ॥

(अत्येकादश च)　॥ ११ ॥

देवीरापः सम्मधुमतीर् मधुमतीभिः सृज्यद्ध्वम्महि वर्चः ख्षत्रियाय वन्वाना अनाधृष्टाः सीदतोर्जस्वतीर्महि वर्चः ख्षत्रियाय दधतीरनिभृष्टमसि वाचो बन्धुस्तपोजाः सोमस्य दात्रमसि शुक्रा वः शुक्रेणोत्पुनामि चन्द्राश्चन्द्रेणामृता अमृतेन स्वाहा राजसूयाय चितानाः। सधमादो द्युम्निनीरूर्ज एता अनिभृष्टा अपस्युवो वसानः॥ पस्त्यासु चक्रे वरुणः सधस्थमपाꣳ शिशुर् ॥ [२१] ॥ मातृतमास्वन्तः॥ ख्षत्रस्योल्बमसि ख्षत्रस्य योनिरस्याविन्नो अग्निर् गृहपतिरा-विन्न इन्द्रो वृद्धश्रवा आविन्नः पूषा विश्ववेदा आविन्नौ मित्रावरुणा वृतावृधावाविन्ने द्यावापृथिवी धृतव्रते आविन्ना देव्यदितिर् विश्वरूप्याविन्नोऽयमसावामुष्यायणोऽस्याँव्विश्यस्मिन् राष्ट्रे महते ख्षत्राय महत आधिपत्याय महते जानराज्यायैष वो भरता राजा सोमोऽस्माकम्ब्राह्मणानाꣳ राजेन्द्रस्य ॥ [२२] ॥ वज्रोऽसि वार्त्रघ्नस्त्वया यँव्वृत्रँव्वद्ध्याच्छत्रुबाधनाः स्थ पात मा प्रत्य-ञ्चम्पात मा तिर्यञ्चमन्वञ्चम्मा पात दिग्भ्यो मा पात विश्वाभ्यो मा नाष्ट्राभ्यः पात हिरण्यव-र्णावुषसाँव्विरोकेऽयःस्थूणावुदितौ सूर्यस्याऽऽरोहतँव्वरुण मित्र गर्तन्ततश्चख्षाथामदितिन्दि-तिञ्च ॥ [२३] ॥

(शिशुरिन्द्रस्यैकचत्वारिꣳशच्च) ॥ १२ ॥

समिधमा तिष्ठ गायत्री त्वा छन्दसामवतु त्रिवृथ्स्तोमो रथन्तरꣳ सामाग्निर् देवता ब्रह्म द्रविणमुग्रामा तिष्ठ त्रिष्टुप् त्वा छन्दसामवतु पञ्चदशः स्तोमो बृहथ् सामेन्द्रो देवता ख्षत्रन्द्र-विणँव्विराजमा तिष्ठ जगती त्वा छन्दसामवतु सप्तदशः स्तोमो वैरूपꣳ साम मरुतो देवता विड् द्रविणमुदीचीमातिष्ठानुष्टुप् त्वा ॥ [२४] ॥ छन्दसामवत्वेकविꣳशः स्तोमो वैराजꣳ साम मित्रावरुणौ देवता बलन्द्रविणमूर्द्ध्वामा तिष्ठ पङ्क्तिस्त्वा छन्दसामवतु त्रिणवत्रयस्त्रिꣳशौ स्तोमौ शाक्वररैवते सामनी बृहस्पतिर् देवता वर्चो द्रविणमीदृङ् चान्यादृङ् चैतादृङ् च प्रतिदृङ् च मितश्च संमितश्च सभराः। शुक्रज्योतिश्च चित्रज्योतिश्च सत्यज्योतिश्च ज्योतिष्माꣳश्च सत्यश्चर्त-पाश्चा ॥ [२५] ॥ ऽत्यꣳहाः। अग्नये स्वाहा सोमाय स्वाहा सवित्रे स्वाहा सरस्वत्यै स्वाहा पूष्णे स्वाहा बृहस्पतये स्वाहेन्द्राय स्वाहा घोषाय स्वाहा श्लोकाय स्वाहाऽꣳशाय स्वाहा भगाय स्वाहा ख्षेत्रस्य पतये स्वाहा पृथिव्यै स्वाहाऽन्तरिख्षाय स्वाहा दिवे स्वाहा सूर्याय स्वाहा चन्द्र-

मसे स्वाहा नक्षत्रेभ्यः स्वाहाऽद्भ्यः स्वाहौषधीभ्यः स्वाहा वनस्पतिभ्यः स्वाहा चराचरेभ्यः स्वाहा परिप्लवेभ्यः स्वाहा सरीसृपेभ्यः स्वाहा ॥ [२६] ॥

(अनुष्टुप्त्वर्तपाश्वं सरीसृपेभ्यः स्वाहा) ॥ १३ ॥

सोमस्य त्विषिरसि तवेव मे त्विषिर् भूयादमृतमसि मृत्योर् मा पाहि दिद्योन्मा पाह्यवेष्टा दन्दशूका निरस्तन्नमुचेः शिरः ॥ सोमो राजा वरुणो देवा धर्मसुवश्च ये। ते ते वाचꣳ सुवन्तान्ते ते प्राणꣳ सुवन्तान्ते ते चक्षुः सुवन्तान्ते ते श्रोत्रꣳ सुवन्ताꣳ सोमस्य त्वा द्युम्नेनाभि षिञ्चा-म्यग्ने ॥ [२७] ॥ स्तेजसा सूर्यस्य वर्चसेन्द्रस्येन्द्रियेण मित्रावरुणयोर् वीर्येण मरुतामोजसा क्षत्राणाङ्क्षत्रपतिरस्यति दिवस्पाहि समाववृत्रन्नधरागुदीचीरहिम्बुद्धियमनु सञ्चरन्तीस्ताः पर्वतस्य वृषभस्य पृष्ठे नावश्चरन्ति स्वसिच इयानाः ॥ रुद्र यत्ते क्रयी परन्नाम तस्मै हुतमसि यमेष्टमसि। प्रजापते न त्वदेतान्यन्यो विश्वा जातानि परि ता बभूव। यत्कामास्ते जुहुमस्तन्नो अस्तु वयꣳ स्याम पतयो रयीणाम् ॥ [२८] ॥

(अग्नेस्तैकादश च) ॥ १४ ॥

इन्द्रस्य वज्रोऽसि वार्त्रघ्नस्त्वयाऽयँवृत्रँवध्यान् मित्रावरुणयोस्त्वा प्रशास्त्रोः प्रशिषा युनज्मि यज्ञस्य योगेन विष्णोः क्रमोऽसि विष्णोः क्रान्तमसि विष्णोर् विक्रान्तमसि मरुता-म्प्रसवे जेषमाप्तम्मनः समहमिन्द्रियेण वीर्येण पशूनाम्मन्युरसि तवेव मे मन्युर् भूयान्नमो मात्रे पृथिव्यै माऽहम्मातरम्पृथिवीꣳ हिꣳसिषम्मा ॥ [२९] ॥ माम्माता पृथिवी हिꣳसीदियदस्या-युरस्यायुर् मे धेह्यूर्गस्यूर्जम्मे धेहि युङ्ङसि वर्चोऽसि वर्चो मयि धेह्यग्नये गृहपतये स्वाहा सोमाय वनस्पतये स्वाहेन्द्रस्य बलाय स्वाहा मरुतामोजसे स्वाहा हꣳसः शुचिषद् वसुरन्तरिक्ष सद्धोता वेदिषदतिथिर् दुरोणसत्। नृषद् वरसदृतसद् व्योमसदब्जा गोजा ऋतजा अद्रिजा ऋतम्बृहत् ॥ [३०] ॥

(हिꣳसिषम्मर्तजास्त्रीणि च) ॥ १५ ॥

मित्रोऽसि वरुणोऽसि समहव्विश्वैर् देवैः ख्षत्रस्य नाभिरसि ख्षत्रस्य योनिरसि स्योनामा सीद सुषदामा सीद मा त्वा हिꣳसीन्मा मा हिꣳसीन्नि षसाद धृतव्रतो वरुणः पस्त्यास्वा साम्रा-ज्याय सुक्रतुर् ब्रह्मा(३)न् त्वꣳ राजन् ब्रह्माऽसि सविताऽसि सत्यसवो ब्रह्मा(३)न् त्वꣳ राजन् ब्रह्माऽसीन्द्रोऽसि सत्यौजा ॥ [३१] ॥ ब्रह्मा(३)न् त्वꣳ राजन् ब्रह्माऽसि मित्रोऽसि सुशेवो ब्रह्मा(३)न् त्वꣳ राजन् ब्रह्माऽसि वरुणोऽसि सत्यधर्मेन्द्रस्य वज्रोऽसि वार्त्रघ्नस्तेन मे रध्य दिशोऽभ्ययꣳ राजाऽभूथ् सुश्लोका(४) सुमङ्गला(४) सत्यराजा(३)न्। अपान्नप्त्रे स्वाहोर्जो नप्त्रे स्वाहाऽग्नये गृहपतये स्वाहा ॥ [३२] ॥

(सत्यौजाश्चत्वारिꣳशच्च) ॥ १६ ॥

आग्नेयमष्टाकपालन्निर्वपति हिरण्यन्दख्षिणा सारस्वतञ्चरुव्वँथ्सतरी दख्षिणा सावित्रन्द्वा-दशकपालमुपद्ध्वस्तो दख्षिणा पौष्णञ्चरुꣳ श्यामो दख्षिणा बार्हस्पत्यञ्चरुꣳ शितिपृष्ठो दख्षिणैन्द्रमेकादशकपालमृषभो दख्षिणा वारुणन्दशकपालम्महानिरष्टो दख्षिणा सौम्यञ्च-रुम्बभ्रुर् दख्षिणा त्वाष्ट्रमष्टाकपालꣳ शुण्ठो दख्षिणा वैष्णवन्त्रिकपालं वामनो दख्षिणा ॥ [३३] ॥

(आग्नेयꣳ हिरण्यꣳ सारस्वतंद्विचत्वारिꣳशत्) ॥ १७ ॥

सद्यो दीख्षयन्ति सद्यः सोमङ्क्रीणन्ति पुण्डरिस्रजाम्प्र यच्छति दशभिर् वथ्सतरैः सोम-ङ्क्रीणाति दशपेयो भवति शतम्ब्राह्मणाः पिबन्ति सप्तदशꣳ स्तोत्रम्भवति प्राकाशावद्ध्वर्यवे ददाति स्रजमुद्गात्रे रुक्मꣳ होत्रेऽश्वम्प्रस्तोतृप्रतिहर्तृभ्यान्द्वादश पष्ठौहीर् ब्रह्मणे वशाम्मैत्राव-रुणायर्षभम्ब्राह्मणाच्छꣳसिने वाससी नेष्टापोतृभ्याꣳ स्थूरि यवाचितमच्छावाकायानड्वाहम-ग्नीधे भार्गवो होता भवति श्रायन्तीयम्ब्रह्मसामम्भवति वारवन्तीयमग्निष्टोमसामꣳ सारस्वतीरपो गृह्णाति ॥ [३४] ॥

(वारवन्तीयञ्चत्वारि च) ॥ १८ ॥

आग्नेयमष्टाकपालन्निर्वपति हिरण्यन्दक्षिणैन्द्रमेकादशकपालमृषभो दक्षिणा वैश्वदेवञ्च-रुम्पिशङ्गी पष्ठौही दक्षिणा मैत्रावरुणीमामिक्षाँव्वशा दक्षिणा बार्हस्पत्यञ्चरुꣳ शितिपृष्ठो दक्षिणाऽऽदित्याम्मल्हाङ्गर्भिणीमा लभते मारुतीम्पृश्निम्पष्ठौहीमश्विभ्याम्पूष्णे पुरोडाशन्द्वा-दशकपालन्निर्वपति सरस्वते सत्यवाचे चरुꣳ सवित्रे सत्यप्रसवाय पुरोडाशन्द्वादशकपालन्ति-सृधन्वꣳ शुष्कदृतिर् दक्षिणा ॥ [३५] ॥

(अग्नेयꣳ हिरण्यमैद्रमृषभो वैश्वदेवम्पिशङ्गी बार्हस्पत्यꣳसप्तचत्वारिꣳशत्) ॥ १९ ॥

आग्नेयमष्टाकपालन्निर्वपति सौम्यञ्चरुꣳ सावित्रन्द्वादशकपालम्बार्हस्पत्यञ्चरुं त्वाष्ट्रमष्टाक-पालँव्वैश्वानरन्द्वादशकपालन्दक्षिणो रथवाहनवाहो दक्षिणा सारस्वतं चरुन्निर्वपति पौष्णञ्च-रुम्मैत्रञ्चरुँव्वारुणञ्चरुङ्क्षैत्रपत्यञ्चरुमादित्यञ्चरुमुत्तरो रथवाहनवाहो दक्षिणा ॥ [३६] ॥

(आग्नेयꣳ सौम्यम्बार्हस्पत्यंचतुस्त्रिꣳशत्) ॥ २० ॥

स्वाद्वीन्त्वा स्वादुना तीव्रान्तीव्रेणामृताममृतेन सृजामि सꣳ सोमेन सोमोऽस्यश्विभ्याम्प-च्यस्व सरस्वत्यै पच्यस्वेन्द्राय सुत्राम्णे पच्यस्व पुनातु ते परिस्रुतꣳ सोमꣳ सूर्यस्य दुहिता। वारेण शश्वता तना॥ वायुः पूतः पवित्रेण प्रत्यङ् क्सोमो अतिद्रुतः। इन्द्रस्य युज्यः सखा॥ कुविदङ्ग यवमन्तो यवञ्चिद् यथा दान्त्यनुपूर्वंव्वियूय। इहेहैषाङ्कृणुत भोजनानि ये बर्हिषो नमोवृक्तिन्न जग्मुः॥ आश्विनन्धूम्रमा लभते सारस्वतम्मेषमैन्द्रमृषभमैन्द्रमेकादशकपालन्नि-र्वपति सावित्रन्द्वादशकपालँव्वारुणन्दशकपालꣳ सोमप्रतीकाः पितरस्तृप्णुत वडबा दक्षिणा ॥ [३७] ॥

(भोजनानिषड्विंꣳशतिश्च) ॥ २१ ॥

अग्नाविष्णू महि तद् वाम्महित्वव्वीतङ्घृतस्य गुह्यानि नाम। दमेदमे सप्त रत्ना दधाना प्रति वाञ्जिह्वा घृतमा चरण्येत्॥ अग्नाविष्णू महि धाम प्रियव्वाँव्वीथो घृतस्य गुह्या जुषाणा। दमेदमे सुष्टुतीर् वावृधाना प्रति वाञ्जिह्वा घृतमुच्चरण्येत्॥ प्र णो देवी सरस्वती वाजेभिर् वाजिनीवती। धीनामवित्र्यवतु। आ नो दिवो बृहतः ॥ [३८] ॥ पर्वतादा सरस्वती यजता गन्तु यज्ञम्। हवन्देवी जुजुषाणा घृताची शग्मान्नो वाचमुशती शृणोतु॥ बृहस्पते जुषस्व नो हव्यानि विश्वदेव्य। रास्व रत्नानि दाशुषे॥ एवा पित्रे विश्वदेवाय वृष्णे यज्ञैर् विधेम नमसा हविर्भिः। बृहस्पते सुप्रजा वीरवन्तो वयङ् स्याम पतयो रयीणाम्॥ बृहस्पते अति यदर्यो अर्हाद् द्युमद् विभाति क्रतुमज्जनेषु। यद् दीदयच्छवस ॥ [३९] ॥ तदप्रजात तदस्मासु द्रविणन्धेहि चित्रम्॥ आ नो मित्रावरुणा घृतैर् गव्यूतिमुक्षतम्। मद्ध्वा रजाꣳसि सुक्रतू॥ प्र बाहवा सिसृतञ्जीवसे न आ नो गव्यूतिमुक्षतङ्घृतेन। आ नो जने श्रवयतय्युवाना श्रुतम्मे मित्रावरुणा हवेमा॥ अग्निव्वः पूर्व्यङ्गिरा देवमीडे वसूनाम्। सपर्यन्तः पुरुप्रियम्मित्रन्न क्षेत्रसाधसम्॥ मक्षू देववतो रथः ॥ [४०] ॥ शूरो वा पृत्सु कासु चित्। देवानाय्य इन्मनो यजमान इयक्षत्यभीदयज्वनो भुवत्॥ न यजमान रिष्यसि न सुन्वान न देवयो॥ असदत्र सुवीर्यमुत त्यदाश्वश्वियम्॥ नकिष्टङ्कर्मणा नशन्न प्र योषन्न योषति॥ उप क्षरन्ति सिन्धवो मयोभुव ईजानञ्च यक्ष्यमाणञ्च धेनवः। पृणन्तञ्च पपुरिञ्च ॥ [४१] ॥ श्रवस्यवो घृतस्य धारा उप यन्ति विश्वतः॥ सोमारुद्रा वि वृहतव्विषूचीममीवा या नो गयमाविवेश। आरे बाधेथान्निर्ऋतिम्पराचैः कृतञ्चिदेनः प्र मुमुक्तमस्मत्॥ सोमारुद्रा युवमेतान्यस्मे विश्वा तनूषु भेषजानि धत्तम्। अव स्यतम्मुञ्चतय्यन्नो अस्ति तनूषु बद्धङ्कृतमेनो अस्मत्॥ सोमापूषणा जनना रयीणाञ्जनना दिवो जनना पृथिव्याः। जातौ विश्वस्य भुवनस्य गोपौ देवा अकृण्वन्नमृतस्य नाभिम्॥ इमौ देवौ जायमानौ जुषन्तेमौ तमाꣳसि गूहतामजुष्टा। आभ्यामिन्द्रः पक्वमामास्वन्तः सोमापूषभ्याञ्जनदुस्रियासु ॥ [४२] ॥

(बृहतःशवसारथःपपुरिञ्चदिवो जननापञ्चविꣳशतिश्च) ॥ २२ ॥

## समाप्ति कोर्वैः

(अनु॑मत्याआग्ने॒यमैं᳚न्द्रा॒ग्नम॒ग्नये॒सोमा॑य प्रतिपू॒रुषमैं᳚न्द्रा॒ग्नंधा॒त्रे बा॑र्॒हस्प॒त्यम॒ग्नये॒र्॒ऽथतो॒दे॒वीः᳚स॒मिध॒ꣳसोम॒स्येन्द्र॑स्य मि॒त्रा᳚ग्ने॒यꣳस॒द्या᳚ग्ने॒यमा᳚ग्ने॒यꣳ॒स्वा॒द्वीन्त्वाऽग्ना॑विष्णू॒द्वावि॑ꣳशतिः)

(अनु॑मत्यै॒यथाऽस॑ति॒दे॒वी॑रापो॑मि॒त्रौ॑ऽसि॒शूरौ॑ वा॒द्विच॑त्वारिꣳशत्)

(अनु॑मत्याउ॒स्त्रिया॑सु)

(इ॒षापौ॑दे॒वस्याऽऽद॑दे॑देवासु॒राःसन्त्वा॑पाकय॒ज्ञमनु॑मत्यै)

॥ हरिः ॐ ॥

**प्रथमकाण्डे अष्टमः प्रश्नः समाप्तः**

| अनुवाकाः | पञ्चाशत्यः |
|---|---|
| २२ | ४२ |

ॐ